श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

॥ समर्पणपद्धतिः चतुर्थी ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

॥ समर्पणपद्धतिः चतुर्थी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

भजामः पादुके ! याभ्यां भरतस्याग्रजस्तदा।
प्रायः प्रतिप्रयाणाय प्रास्थानिकमकल्पयत् ॥ **4.1** ॥

राज्यं विहाय रघुवंशमहीपतीनां
पौरांश्च पादरसिकान् पृथिवीं च रक्ताम्।
त्वामेव हन्त चरणावनि ! सम्प्रयास्यन्
आलम्बत प्रथममुत्तरकोसलेन्द्रः ॥ **4.2** ॥

प्राप्ते प्रयाणसमये मणिपादरक्षे !
पौरानवेक्ष्य भवती करुणप्रलापान्।
मञ्जुप्रणादमुखरा विनिवर्तनार्थं
रामं पदग्रहणपूर्वमयाचतेव ॥ **4.3** ॥

मत्वा तृणाय भरतो मणिपादरक्षे !
रामेण तां विरहितां रघुराजधानीम्।
त्वामेव सप्रणयमुज्जयिनीमवन्तीं
मेने महोदयमयीं मधुरामयोध्याम् ॥ **4.4** ॥

रामात्मनः प्रतिपदं मणिपादरक्षे !
विश्वम्भरस्य वहनेन परीक्षितां त्वाम्।

विश्वस्य देवि वहने विनिवेशयिष्यन्
विस्रब्ध एव भरतो भवतीं ययाचे॥ **4.5** ॥

भक्त्या परं भवतु तद् भरतस्य साधोः
त्वत्प्रार्थनं रघुपतौ मणिपादरक्षे !।
केनाऽऽशयेन स मुनिः परमार्थदर्शी
भद्राय देवि ! जगतां भवतीमवादीत्॥ **4.6** ॥

रामे वनं व्रजति पङ्क्तिरथे प्रसुप्ते
राज्यापवादचकिते भरते तदानीम्।
आश्वासयेत् क इव कोसलवासिनस्तान्
सीतेव चेत् त्वमपि साहसवृत्तिरासीः॥ **4.7** ॥

पादावनि ! प्रभवतो जगतां त्रयाणां
रामादपि त्वमधिका नियतं प्रभावात्।
नो चेत् कथं नु भरतस्य तमेव लिप्सोः
प्रत्यायनं परिपणं भवती भवित्री॥ **4.8** ॥

मन्ये नियुज्य भवतीं मणिपादरक्षे !
पार्ष्णिग्रहस्य भरतस्य निवारणार्थम्।
रत्नाकरं सपदि गोष्पदयन् विजिग्ये
रामः क्षणेन रजनीचरराजधानीम्॥ **4.9** ॥

पादावनि ! प्रभुतरानपराधवर्गान्
सोढुं क्षमा त्वमसि मूर्तिमती क्षमैव।
यत् त्वां विहाय निहताः परिपन्थिनस्ते
देवेन दाशरथिना दशकण्ठमुख्याः॥ **4.10** ॥

वाक्ये गरीयसि पितुर्विहितेऽप्यतृप्त्या
मातुर्मनोरथमशेषमवन्ध्ययिष्यन्।

मन्ये तदा रघुपतिर्भरतस्य तेने
मातस्त्वयैव मणिमौलिनिवेशलक्ष्मीम् ॥ **4.11** ॥

पादाम्बुजाद्विगळितां परमस्य पुंसः
त्वामादरेण विनिवेश्य जटाकलापे।
अङ्गीचकार भरतो मणिपादरक्षे !
गङ्गाधिरूढशिरसो गिरिशस्य कान्तिम् ॥ **4.12** ॥

अविकलमधिकर्तुं रक्षणे सप्तलोक्या
रघुपतिचरणेन न्यस्तदिव्यानुभावाम्।
अभजत भरतस्त्वामञ्जसा पादरक्षे !
मणिमकुटनिवेशत्यागधन्येन मूर्ध्ना ॥ **4.13** ॥

इयमविकलयोगक्षेमसिद्ध्यै प्रजानाम्
अलमिति भरतेन प्रार्थितामादरेण।
रघुपतिरधिरोहन्नभ्यषिञ्चत् स्वयं त्वां
चरणनखमणीनां चन्द्रिकानिर्झरेण ॥ **4.14** ॥

प्रणयिनि पदपद्मे गाढमाश्लिष्यति त्वां
विधिसुतकथितं तद्वैभवं ते विदन्तः।
अनुदिनमृषयस्त्वामर्चयन्त्यग्र्यगारे
रघुपतिपदरक्षे ! रामगिर्याश्रमस्थाः ॥ **4.15** ॥

नियतमधिरुरोह त्वामनाधेयशक्तिं
निजचरणसरोजे शक्तिमाधातुकामः।
स कथमितरथा त्वां न्यस्य रामो विजह्रे
दृषदुपचितभूमौ दण्डकारण्यभागे ॥ **4.16** ॥

रघुपतिपदपद्माद्रत्नपीठे निवेष्टुं
भरतशिरसि लग्नां प्रेक्ष्य पादावनि ! त्वाम्।

परिणतपुरुषार्थः पौरवर्गः स्वयं ते
    विधिमभजत सर्वो वन्दिवैताळिकानाम् ॥ **4.17** ॥

अनन्यराजन्यनिदेशनिष्ठां
    चकार पृथ्वीं चतुरर्णवान्ताम्।
भ्रातुर्यियासोर्भरतस्तदा त्वां
    मूर्ध्ना वहन् मूर्तिमतीमिवाज्ञाम् ॥ **4.18** ॥

यद् भ्रात्रे भरताय रङ्गपतिना रामत्वमातस्थुषा
    नित्योपास्यनिजाङ्घ्रिनिष्क्रयतया निश्चित्य विश्राणितम्।
योगक्षेमवहं समस्तजगतां यद्दीयते योगिभिः
    पादत्राणमिदं मितम्पचकथामह्लाय मे निह्नुताम् ॥ **4.19** ॥

भरतस्येव ममापि प्रशमित विश्वापवाददुर्जाता।
शेषेव शिरसि नित्यं विहरतु रघुवीरपादुके ! भवती ॥ **4.20** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे समर्पणपद्धतिः चतुर्थी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥